रोधने वा क्तः । स्तम्भेः अवाच्चेति यः । अवा-
चालम्बन इति सूत्रेण आविदूर्य्ये स्तम्भेः षत्व-
विधानादवष्टब्धशब्द आसन्नपर इति अद्यश्वीना-
वष्टब्धे इत्यत्र मनोरमायां स्थितं ।) अविदूरः ।
समीपं । अवलम्बितं । आश्रितं । इत्यमरः ॥ बद्धः ।
रुद्धः । इति भरतः ॥ आक्रान्तः । इति मेदिनी ॥

अवष्टम्भः, पुं, (अव + ष्टम्भु रोधे इति + घञ् । षत्वञ्च ।) स्वर्णं ।
("रघोरवष्टम्भमयेन पत्त्रिणा
हृदि क्षतो गोत्रभिदप्यमर्षणः" ।
इति रघुवंशे ।) स्तम्भः । प्रारम्भः । इति मेदिनी ॥
सौष्ठवं । इति हलायुधः ॥ (अवलम्बनं । बोधनम् ।
निष्पन्दता ।)

अवष्वाणं, क्ली, (अव + ष्वन शब्दे + घञ् । षत्वञ्च ।)
भक्षणं । इति हेमचन्द्रः ॥

अवस्, व्य, (अवर + पूर्व्वाधरावराणामित्यसि-
प्रत्ययः, तत्सन्नियोगेन अवरस्य अवादेशश्च ।)
व्यतिरेकः । इति केचित् ॥

अवसः, पुं, (अव रक्षणादौ अवति इति अत्यवि-
चमीत्यादिना असच् प्रत्ययः ।) राजा । सूर्य्यः ।
इति सिद्धान्तकौमुदी ॥

अवसं, क्ली, (अव + असिच् भावे ।) रक्षणं । वैदिक-
शब्दोऽयं ॥

अवसक्थिका, स्त्री, (अवबद्धे सक्थिनी यया बन्ध-
प्रणाल्या सा,अव + सक्थि + समासे कप् ।)खट्वा ।
तत्पर्य्यायः । पर्य्यस्तिका २ परिकरः ३ पर्य्यङ्कः ४ ।
इति हेमचन्द्रः ॥ (पर्य्यङ्कबन्धः । वस्त्रादिद्वारा पृष्ठ-
जानु-जङ्घा-द्वयदृढ़बन्धनपूर्व्वकोपवेशनं । यथा,—
"आसनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा ।
कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते" ॥
इति कात्यायनः ।
"शयानः प्रौढ़पादश्च कृत्वा चैवावसक्थिकाम् ।
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च" ॥
इति मनुः ।)

अवसथः, पुं, (अव + सो + कथन् ।) छात्रनिलयः ।
इति हेमचन्द्रः ॥ पाठशाला चौपाड़ी यस्य
प्रसिद्धिः । ग्रामः । इति शब्दरत्नावली ॥ गृहं ।
इति हलायुधः ॥

अवसथ्यः, पुं, (अवसथ + यत् ।) छात्रवेश्म ।
इति हेमचन्द्रः ॥ चौपाड़ी इति भाषा ॥

अवसन्नः, त्रि, (अव + सद + क्त ।) अवसादप्राप्तः ।
विषण्णः । यथा,—
"महिम्नः पारन्ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्व्वःस्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः" ॥
इति पुष्पदन्तकृतशिवस्तोत्रं । अपि च ।
"आचारेणावसन्नोऽपि पुनः प्रार्थयते यदि" ।
इति व्यवहारतत्त्वं ॥

अवसरः, पुं, (अव + सृ + अच् ।) प्रस्तावः । मन्त्र-
विशेषः । वर्षणं । इति मेदिनी ॥ वत्सरः । क्षणं ।
इति हेमचन्द्रः ॥ अवकाशः । यथा । "गो-
वधे एका चेद्बहुभिरित्युपदेशेन दण्डवत् प्राय-
श्चित्तानि भवन्तीत्यतिदेशानवसरात् । तदवस-
रत्वे प्रत्येकं पूर्णप्रायश्चित्तदैगुण्यं स्यात्" । इति
प्रायश्चित्ततत्त्वं ॥ (योग्यकालः । क्रियास्थितियोग्य-
तासम्पादककृत्यः कालिकोऽवकाशः । यथा,—
"कामस्तु बाणावसरं समीक्ष्य" । इति कुमारे ।
शिष्यजिज्ञासानिवृत्तत्ववत्त्ववक्तव्यत्वरूपः सङ्गति-
विशेषः । अनन्तरवक्तव्यत्वम् अवसरः । "उप-
मानेऽवसरसङ्गतिः" । इति जगदीशः ।)

अवसर्गः, पुं, (अव + सृज् + घञ् ।) स्वेच्छाचारः ।
तत्पर्य्यायः । प्रकाम्यं २ स्वाच्छन्द्यं ३ अनुमननं ४ ।
इति त्रिकाण्डशेषः ॥

अवसर्पः, पुं, (अव + सृप् + अच् ।) अपसर्पः । चरः ।
इत्यमरटीकायां भरतः ॥

अवसर्पिणी, स्त्री, (अव + सृप + णिनि ङीप् ।)
जिनानां कालविशेषः । स तु दशकोटिकोटि-
सागरवर्षैः समाप्यते । इति हेमचन्द्रः ॥

अवसव्यं, त्रि, अपसव्यं । दक्षिणं । इति रायमुकुटः ॥

अवसादः, पुं, (अव + सद + घञ् ।) अवसन्नता ।
तत्पर्य्यायः । विषादः २ सादः ३ विषण्णता ४ ।
इति हेमचन्द्रः ॥ (शेषः । क्षयः । यथा,—
"धैर्य्यावसादेन हृतप्रसादा
वन्यद्विपेनेव निदाघसिन्धुः" ।
इति किरातार्ज्जुनीये ।)

अवसानं, क्ली, (अव + सो + ल्युट् ।) क्रियासमाप्तिः ।
शेषः । तत्पर्य्यायः । सातिः २ । इत्यमरः ॥ विरामः
३ । इति जटाधरः ॥ मृत्युः ।
("पुंसोऽवसानं व्रजतोऽपि निष्ठुरे-
ष्विष्टैधनैः पञ्चपदीनमुच्यते" ।
इति पञ्चतन्त्रे ।) सीमा । इति हेमचन्द्रः ॥

अवसायः, पुं, (अव + सो + घञ् ।) शेषः । समाप्तिः ।
निश्चयः । इति मेदिनी ॥

अवसितं, त्रि, (अव + सो + क्त ।) परिपक्वमर्दित-
धान्यं । तत्पर्य्यायः । ऋद्धं २ । इति भरतमेदिन्यौ ॥
ज्ञातं । अवसानगतं । समाप्तं । तत्पर्य्यायः । सितः
२ । इत्यमरमेदिन्यौ ॥ ("यदि नेपथ्यविधानम्
अवसितम्" । इति शाकुन्तले ।)

अवसेकिमः, पुं, (अवसेकेन + निर्वृत्तः । अवसेक +
इमनुच् ।) वटकः । इति हेमचन्द्रः ॥ वड़ा इति-
भाषा ॥

अवस्कन्दः, पुं, (अव + स्कन्द + अच् ।) विजिगीषूणां
निवेशस्थानं । शिविरं । इति हलायुधः ॥ अव-
गाहनं । यथा,—
"लतानुपातं कुसुमान्यगृह्णात्
स नद्यवस्कन्दमुपास्पृशच्च ।
कुतूहलाच्चारुशिलोपवेशं
काकुत्स्थ ईषत् स्मयमान आस्त" ॥
इति भट्टौ २ सर्गे ११ श्लोकः ॥ नद्यामवस्कन्दो-
ऽवगाहो यत्र स्नानक्रियायां । इति तट्टीकायां
भरतः ॥ (आक्रमणं । यथा,—
"अवस्कन्दभयात् राजा प्रजागरकृतश्रमम् ।
दिवासुप्तं समाहन्यान्निद्राव्याकुलसैनिकम्" ॥
इति हितोपदेशः ।)

अवस्कन्दनं, क्ली, (अव + स्कन्द + ल्युट् ।) अव-
गाहनं । इति भट्टिः ॥ अवतरणं । इति महा-
भारतं ॥ अवपूर्व्वस्कन्दधातोर्ल्युट्प्रत्ययेन निष्पन्नं ॥

अवस्करः, पुं, (अव कीर्य्यते क्षिप्यते इति । अव +
कॄ + अप् + सुट् ।) विष्ठा । गुह्यं । इत्यमरमेदिन्यौ ॥
संमार्ज्जन्यादिनिक्षिप्तधूल्यादि । इत्यमरटीकायां
मथुरानाथः सारसुन्दरी च ॥

अवस्तात्, व्य, (अवरस्मिन्, अवरस्मात्, अवरमि-
त्यर्थे अस्तातिः ।) अवरे । पश्चात् । शेषे । अन्ते ।
इति पाणिनिः ॥ ("अवस्तात्स्वर्गलोकं प्रापयन्तः" ।
इति शतपथब्राह्मणे ।)

अवस्तारः, पुं, (अव + स्तॄ + घञ् ।) यवनिकादिः ।
कानात् इत्यादि भाषा ॥ अवस्तीर्य्यतेऽनेनेति स्तॄञ्
आच्छादने घञ् ॥

अवस्तु, क्ली, (न वस्तु । नञ्तत्पुरुषः ।) असद्वस्तु ।
(यथा,—
"अवस्तुनिर्ब्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः" ।
इति कुमारे ।) वेदान्तमते अज्ञानादिसकल-
जड़समूहः ॥

अवस्था, स्त्री, (अव + स्था + अङ् ।) दशा । कालि-
कविशेषः । इत्यमरः ॥
"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि ।
कैशोरमापञ्चदशात् यौवनन्तु ततः परं ॥
आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते ।
वृद्धस्तु सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परं" ॥
इति स्मृतिः ॥

अवस्थाचतुष्टयं, क्ली, (अवस्थायाश्चतुष्टयं । तत्पुरुषः ।)
कालकृतचतुर्विधदशा । यथा । "आपञ्चदशवर्षं
बाल्यं । आत्रिंशद्वर्षं कौमारं । आपञ्चाशद्वर्षं यौ-
वनं । पञ्चाशत ऊर्द्ध्वं वृद्धत्वं" । इति वैद्यकशास्त्रे ॥

अवस्थानं, क्ली, (अव + स्था + ल्युट् ।) स्थितिः ।
वासः । यथा । "परः सन्निकर्षश्च उपर्य्यधोभावा-
पन्नसमसूत्रपातन्यायेनैकराश्यवच्छेदेन सद्भाव-
स्थानरूपः" । इति तिथ्यादितत्त्वं ॥ (अवस्था ।
प्रतिष्ठा । यथा, "कीदृक् ते व्यसनावस्थानम्" ।
इति पञ्चतन्त्रं ।
"पद्भ्यां दृढ़मवस्थानं स कृत्वा कपिकुञ्जरः" ।
इति रामायणं ॥)

अवस्थितः, त्रि, (अव + स्था + क्त ।) कृतावस्थानः ।
अवस्थितिविशिष्टः । स्थितं । यथा ।
"यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्त्तराष्ट्राः" ।
इति श्रीभगवद्गीतायां २ अध्याये ६ श्लोकः ॥

अवस्थितिः, स्त्री, (अव + स्था + क्तिन् ।) अवस्थानं ।
थाका । इति भाषा । अवपूर्व्वकस्थाधातोः क्ति-
प्रत्ययेन निष्पन्ना ॥ (अनुसरणम् । अभ्यासः ।)

अवहस्तः, पुं, (अवरं हस्तस्य । एकदेशी तत्पुरुषः ।)
हस्तपृष्ठं । इति हेमचन्द्रः ॥

अवहारः, पुं, (अव + हृ + घञ् ।) चौरः । द्यूत-
युद्धादिविश्रामः । निमन्त्रणं । उपनेतव्यत्वं ।